# Parameshvara Stotram

# परमेश्वरस्तोत्रम् ४

## Document Information

Text title : Parameshvara Stotram

File name : parameshvarastotram4.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 1/1-10||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# परमेश्वरस्तोत्रम् ४

श्रीश्वेतायनव्यास उवाच ।
ॐ नमो युगरूपाय नमस्तिष्यादिमोक्षिणे ।
बालयोगिनीनाथाय नमस्ते बालयोगिने ॥ १॥

नमोऽसङ्कचरित्राय नमश्चानन्दवार्धये ।
नमस्ते बालकृष्णाय बालान्तरात्मने नमः ॥ २॥

चिदचिद्वपुषेऽनादिश्रीकृष्णाय नमो नमः ।
बद्रिकापतये नरनारायणात्मने नमः ॥ ३॥

सर्वसौख्यविधात्रे ते सर्वधर्माधिकारिणे ।
यावल्लीलादिवास्याय नमस्ते साधुरूपिणे ॥ ४॥

साध्वीशक्तिसुमिश्राय स्वर्णरेखाजटाधृगे ।
एकरसस्वरूपाय सरोजनीजुषे नमः ॥ ५॥

एकधा दशधा सहस्रधा कोट्यर्बुदाब्जधा ।
कान्ताकान्तोऽन्वितश्चास्ते पृथक् चापि च ते नमः ॥ ६॥

यो दधार तु राधायाः कृते कृष्णं निजं वपुः ।
यश्च श्रियः कृते नारायणो नारायणेश्वरः ॥ ७॥

यश्च रम्यं वासुदेवं व्यूहं दधार सृष्टये ।
यश्च हिरण्मयं रूपं विष्णुरूपं दधार च ॥ ८॥

तथा तिष्याऽर्दितानां तूद्धाराय तापसां वपुः ।
धर्माद्दधार भगवान् नरनारायणात्मकम् ॥ ९॥

सर्वथा करुणापूर्णं साधुशीलसमन्वितम् ।
मुक्तर्षिसेवितं शान्तं तं नमामि परेश्वरम् ॥ १.१०॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः तिष्यसन्तानात्मकस्य चतुर्थखण्डे

प्रथमाध्यायन्तर्गतं परमेश्वरस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ४। अध्याय १/१-१०॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 1/1-10..

Proofread by PSA Easwaran

*Parameshvara Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*